# श्रीसोमनाथसंस्कृतयुनिवर्सिटी ,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा- शास्त्रिद्वितीयवर्षम्(SEM- 4) | **प्रश्नपत्रम् – ५ (OLD)** | गुणा: - ७० |
| विषय: - नव्यव्याकरणम् | **कोड – CC.2.4.7** | समय: - ३:०० त: ६:०० |
| दिनाङ्क: - ०३-०४-२०१९ | सन्दर्भग्रन्थः – वैयाकरणसिद्धान्तकौमुदी,महाभाष्यञ्च \| | |

.................................................................................................................

**प्रथमान्वितिः**

**प्रश्नः-१ निम्नलिखितेषु सूत्रेषु द्वयो सूत्रयो: सोदाहरणं व्याख्या कार्या |** **(१०)**

(१) अरुर्द्विषदजन्तस्य मुम् |

(२) कर्तर्युपमाने |

(३) उदिकुले रुजि वहो: |

**प्रश्नः-२ निम्नलिखितासु साधनिकासु काश्चित् चतस्रः ससूत्रं साधनीया: |** **(१०)**

(१) अभ्रंलिहः (२) सुतङ्गमः (३) अग्निचित् (४) अन्नादः

(५) प्रियंवदः (६) जग्धः

**द्वितियान्वितिः**

**प्रश्नः-३ निम्नलिखितेषु सूत्रेषु द्वयो सूत्रयो: सोदाहरणं व्याख्या कार्या |** **(१०)**

(१) विदेः शतुर्वसुः |

(२) त्रसिगृधिधृषिक्षिपेः क्नुः |

(३) जल्पभिक्षकुट्टलुण्ठवृङः षाकन् |

**प्रश्नः-४ निम्नलिखितासु साधनिकासु काश्चित् चतस्रः ससूत्रं साधनीयाः |** **(१०)**

(१) विदुषी (२) बिभ्राणः (३) धारयन् (४) गृध्नुः

(५) प्रवासी (६) श्रद्धालुः

**तृतीयान्वितिः**

**प्रश्नः-५ निम्नलिखितेषु द्वयो: व्याख्या कार्या |** **(१०)**

(१) लक्ष्य लक्ष्यणे व्याकरणम् |

(२) ज्ञाने धर्मः इति चेत्तथाऽधर्मः |

(३) आगमाश्च विकाराश्च प्रत्यया सह धातुभिः | उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः ||

**प्रश्नः-६ कस्यापि एकस्य प्रश्नोत्तरं सविस्तरं ददत |** **(१०)**

(१) शब्दस्य ज्ञाने धर्मः प्रयोगे वा |

(२) 'सिद्धे शब्दार्थसम्बन्धे' इत्यस्य व्याख्यां कुरुत |

**प्रश्न:-७ निम्नलिखितेषु दशप्रश्नानां एकैकवाक्येन उत्तरं लिखत |** **(१०)**

(१) 'खश्' प्रत्यये अनुबन्धलोपे किमवशिष्यते ?

(२) 'खिष्णुच्' प्रत्यय: केन सूत्रेण भवति ?

(३) 'अन्नाद:' इत्यत्र क: प्रत्यय: ? किञ्च सूत्रम् ?

(४) 'कुमारघाती' इत्यस्य क: विग्रह: ?

(५) "इस्मन्त्रन्क्विषु च" सूत्रस्य किं कार्यम् ?

(६) 'विदुषी' इत्यत्र संप्रसारणं भवति न वा ?

(७) 'सत्' संज्ञा कस्य भवति केन च सूत्रेण ?

(८) 'ताच्छील्य' शब्दस्य कोऽर्थ: ?

(९) 'क्नु' प्रत्ययस्य उदाहरणद्वयं लिखत |

(१०) 'धात्री' शब्दस्य विग्रह: क: ? कश्च धातु: ?

(११) आकृति: नित्याऽनित्या वा ?

(१२) 'उत्सर्ग:' शब्दस्य कोऽर्थ: ?

(१३) इन्द्र: प्रवक्ता अध्येता वा ?

(१४) 'वृत्तिसमवायार्थ: उपदेश:' इत्यत्र समवाय एवञ्च वृत्ते: क: ग्राह्योऽर्थ: ?

(१५) संवृतादय: के ?